कुवलयानन्दः

२५७

६१ पत्राणि

८८

काव्य

॥ [illegible] गोपाल सहस्र ॥

कु०

श्रीगणेशाय नमः ।। ।। ॐ अंबरीकाबरीभार[illegible]भ्रमरीमुखरीकृतं ।। दू
रीकरोतु दुरितं गौरीचरणपंकजं ।। १ ।। वरस्परतपःसंचयक
कांक्षितपरस्परौ ।। पार्वतीच मातापितरौ प्रांचौ जगतां पती स्तद्रु
मः ।। २ ।। उद्घाद्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादे
पि यथारुचि गृह्यमाणः ।। यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुंदः ।। ३ ।। अलंकारेषु बाला
नामवगाहन सिद्धये ।। ललितः क्रियते तेषां लक्ष्यलक्षणसंग्र
हः ।। ४ ।। येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः ।। प्रा

यस्तत्वतेषामितरेषांवर्णिनवाविरच्यंते ॥५॥ उपमापञ्चसाद
श्यलक्ष्मीरुल्लसतिद्वयोः ॥ हंसीववक्त्रहतकीर्तिः स्वर्गगामवगा
हते ॥६॥ यत्रोपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चा
त४ रुसादृश्यमल्हृदयोल्लसति सैवमर्यादां विनास्वच्छंदप्रका
शते ॥ तत्रोपमावैलंकारः हंसीववक्त्रहरणं ॥ इयं चपूर्णो
पमेत्युच्यते ॥ हंसीकीर्तिः स्वर्गगावगाहनमिव शाहश्वेते
तेषामनुपमानोपमेयसाधारणधर्मोपमावाचकानां
वतणी

७०

नप्युपादानाद्... वा। गुणदोषौ बुधो गृह्णन्निन्दु[illegible]डाविवेश्व-
२ रः॥ शिरसा श्लाघते पूर्वं परं कंठे नियच्छति॥ ६॥ अत्र यद्यपि
उपमानोपमेययोर्नैकः साधारणो धर्मः उपमाने ईश्वरे चंद्र-
गरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसा
श्लाघनं वहनं उत्तरस्य गरलस्य कंठे नियमनं स्थापनं। उपमे-
मेये बुधे गुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वगुणस्य
शिरसा श्लाघनं शिरःकंपेनाभिनंदनं उत्तरस्य दोषस्य कं-
ठे नियमनं कंठादुपरि वाचा अनुद्घाटनमिति भेदास्त

थापि चंद्रगरलयोर्ग्रहदाहयोश्च बिंबप्रतिबिंबभावेनाभेदा
दुपादानज्ञानादीनां गरुत्मन्नइसेक शब्दोपादानेनाभेदाध्यवसा
याच्च साधारणधर्मता लिपूर्वस्माद्विशेषः। वस्तुतोभिन्नयोरपि
उपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपा
दानं बिंबप्रतिबिंबभाव इत्यालंकारिकसमयः॥ वत्यैवमानध
र्माणामुपमावाचकस्य चाप्रकृत्यनुपादाने भिन्नालुप्तोपमाऽ
थातडिद्गौरीं दुकूल्यास्या कर्पूरं तीदृशो मे मत्कीर्त्यास्मरवधूर्वती
हृष्टातथ्यैरहो मया॥ यत्त्वामेलनं तावलीभो मेयश्चतादृतः॥

तद्वेतत्काकतालीयमवितर्कितसंभवं ॥ उपमेयादीनां चतुर्णां प्र
ध्ये एकस्य द्वयोस्त्रयाणां च प्रतिपादकशब्दाभावे न लुप्तोपमेष्य
3 ष्यते सा चाष्टधा यथा वाचकलुप्ता धर्मलुप्ता उपमानलुप्ता धर्मवा
चकलुप्ता । वाचकोपमेयलुप्ता । वाचकोपमानलुप्ता धर्मोपमान
लुप्ता धर्मोपमानवाचकलुप्ता चेति तत्र उपमानलोपरहिता
श्चत्वारो भेदास्तड्डि क्रौशिसादिश्लोकेन प्रदर्शिताः तदुक्तो भेदा
उत्तरश्लोकेनैत ड्डि क्रौशि सत्र वाचकलोपः तड्डि द्विव गोशः सर्थे उप
मानानि सामान्यवचनैरिति समासविधायकशास्त्रकृतः इकुल

कु०

काकतालसमवेतक्रियावर्त्तिनौ तेन काकागमनमिव तालपतनमि
व काकतालमितीवार्थे समासाद्य तीद्धि छ पाद्धिति ताप कासमासः
उभयत्रोपमेयं स्वस्य चाचिद्गमनं तत्रैव रहसितन्व्याअवस्थानं च तेन स्वस्य
तन्व्याश्च समागमः काकतालसमागमसदृश इति कल्पितं ततः काकता
लमिवेव काकतालीयमिति द्वितीयस्मिन्निवार्थे समासाद्य तद्धि छया
द्धिति सूत्रेण इवे प्रतिकृताविति यधिकारस्येन छ प्रसयेः तथा च
पतनं दृ लितं तालफलं यथा काकेनोपभुक्तं एवं रहोदर्शनसुखमि
तहदयातन्वीस्वेनोपभुक्तमिति पं: ततश्चात्र काकागमनतालप

अग्न वच्चि ब्रु वि मिलेद् इति पाठे इति भावः ॥४

तन समागमनरूपस्य काकतालोपमोगरूपस्य चोपमानस्यानुपा
दानात्। प्रत्ययार्थोपमायामुपमानलोपैः समासार्थोपमायां वाचको
पमानलोपः सर्वोप्ययं लोपः छप्रत्ययविधायकशास्त्रकृतः अवि
तर्कितसंभवमिति साधारण धर्मस्यानुपादाने प्रत्ययार्थोपमा
यां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाचकलोप
इति सूक्ष्ममिह शोधातव्यं एतेषामुदाहरणांतराणि विस्तरभयान्न लि
ख्यंते ॥१॥ उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ॥ इन्दुरिन्दुरिव
श्रीमानित्यादौ तदनन्वयः ॥२॥ एकस्यैव वस्तुनः उपमानोपमे

साधर्म्यस्याद्वितीयपरूपतयार बाध्यकाल्लिन मित्रवगोजन्मपेक्षा

कु.

यत्र वर्ण्यमानमन्वयः वर्ण्यमानमपि स्वस्य [illegible] सेन साधर्म्यं नान्यस्तीति व्यक्त्यन्नाम

तोऽनन्वयि नोपमेयस्योपमानं सदृशान्तरव्यवच्छेदे नानुपमेयत्वं द्योतनायं

5 नायं इन्दुरिन्दुरिव श्रीमानिन्दुरिव श्रीमत्ये चन्द्रस्य नान्यः सदृशोऽस्तीति सदृशान्तर

शान्तरव्यवच्छेदो जक्ष्यते तत्र स्वस्य नापि सादृश्यासंभवात् उपमेयत्वेपर्यवसानं यथा वा ॥ गगनं गगनाकारं सागरः सागरोपमः ॥ राम रावणयोर्युद्धं रामरावणयोरिव ॥ पूर्वेहि हरन्ते श्रीमत्स्वस्य धर्मस्योपादानमस्ति इह तु गगनादिषु वैपुल्यादिधर्मस्य तदनास्तीति विशेषः ॥ पर्यायेण द्वयोस्तच्चेदु० पमानोपमेयता ॥ धर्मोर्थ इव वृद्ध्यस्ते रथोर्धर्म इव वर्द्धते ॥ द्वयोः पर्यायेण उपमानो पमेयकल्पनं तृतीयसादृश्यव्यवच्छेदार्थं । धर्मोर्थ यो हि कस्य चित्केन

५

चित्सादृश्ये वर्षित तस्माद्व्यनेन सादृश्यमर्थसिद्धमपि मुखतो वस्तु प्रा
नंत्वतीयसादृश्यव्यवच्छेदार्थं कालति पौथावा॥ खमिव जलं जलमिव खं
हंसश्चंद्र इव चंद्र इव हंसः॥ कुमुदाकारास्तारास्ताराकाराणि कुमुदानि॥
पूर्वत्र कर्णमीरिति धर्म उपात्तः॥ इह निर्मलत्वादिधर्मो नोपात्त इति भे
दः॥ उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनें राद्धि धर्मो
र्थसमृद्धेः शरदि गगनसलिलादिनैर्मल्यस्य वर्णनीयत्वात्॥ प्रकृताप्रकृ
तयोर्मध्ये वा संभवति। यथा गिरिरिव गजराजो यैं गजराज इवोच्चके
र्विभाति गिरिः॥ निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति। प्र

कु॰

तीव्रत्वमानस्य स्वरूपेण परकाल्पनं ॥ तल्लोचनस्मेव यूं वद्धकृत सहशो॰
विधुः ॥ प्रसिद्धोपमानोपमेयप्रातिलोम्यात्प्रतीपं यथा वा ॥ यदन्नेत्र
समानकान्ति सलिले मग्नं तदिन्दीवरं मेघैरन्तरितः प्रिये तव मुखच्छा
यानुकारी शशी ॥ येपि त्वद्गमनानुसारि गतयस्ते राजहंसा गता
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ अन्योपमेयलाभेन व
र्ण्यस्यानादरश्चेतरत् ॥ अलं गर्वेण ते वक्त्र कान्त्या चन्द्रोपि तादृशः ॥ अ
त्र वक्त्रप्रतिपन्नतया वर्ण्यमानस्य सादृश्यमसहमानस्योपमेयं किं
चित्कर्यं तावता तस्यातिरस्कारो हि तीयं प्रतीपं ॥ पूर्वस्मादपि वि

६

नमस्कारः।

नेनु म

षित्ति विशेषशालि यथावाग्गर्वु मसंभाव्य मिमलो वनयुगलेन किंवदसि
मङ्गु।।संतिहशानिदिशिदिशि सरसूनीलनलिनानि।। वन्ध्यापर्वयल्ला
येनतथान्यस्याप्यनादरः।।कः क्रौञ्चदर्पदलोमशोधतुल्याः संतिक्षि
स्त्रियः।।अहह्रूरस्यजनतयाकचिदप्युपमानभावमसहमानसूववर्ण्यम्
पमेयंपरिकल्प्य तावमातस्य तिरस्कारः पूर्वप्रतीपवैवरीत्येन तत्तृतीयं
यथावा।अहमेवगुरुः सुदारुणानामितिहालाहलमास्मतातदृप्यः।।न
न्संति भवादृशानिभूयोभुवनेस्मिन्वचनानिदुर्जनानी।।वर्त्यनान्य
स्यापमायाअनिनिष्पत्तिवचष्यतत्।।यथापवादो मुग्धाक्षि सत्वन्मुखाभं
कित्लाम्बुजं।।अवर्ण्येवर्ण्योपमिसनिष्पत्तिवचनेपूर्वेषयउकर्ष्ये शा

लि चतुर्थं प्रतीपं ॥ उदाहरणेष्वधापयादेर्युपमित्यनिष्पत्तिरुष्टा हिता यथा वा ॥
आकर्णय सरोजाक्षि वचनीयमिदं कुवि ॥ शशांकस्तव वक्त्रोपमा परे रूपमीय ए २
ते ॥ प्रतीपमुपमानस्य कैमर्थ्यमपि मन्यते ॥ इदं चेद्दृह न तस्याः किं पुन
न विमिंदुना ॥ उपमेयस्यैवोपमानप्रयोजकधूर्वहत्वेन उपमानप्राप्तिलो
प्यात्पंचमं प्रतीपं ॥ यथा वा ॥ तद्वाणस्तु यशस्तस्य तावितमोरये चिचित्ते
कुरुते यदा यदा ॥ तमोति मानोः परिवेषकौलवाप्त तद्विविधिः कुंडलनां विधोर
पि ॥ केचिदनन्वयो[illegible] पमानोपमेयताप्रतीपानां उपमाविशेषत्वेन तदं
तर्भावं मन्यते ॥ अन्येतु पंचमं प्रतीपप्रकारमुपमाक्षेपरूपत्वात् आक्षेपालं
कारमाहुः ॥ विषयस्यापह्नुतारूप्यरंजनं विषयस्य यत्र ॥ रूपकं तत्त्रिधाधि
क्यन्यूनत्वानुभयोक्तिभिः ॥ अयैधरुजहिः साधाद्येनद्ग्याः दूरखणात् ॥

अथ मारस्ते विनाशं प्रस्तातीवीकं विक्रोचनं॥ शंप्रविश्वप्रवरदा॥खीवृसमहिषितां॥
अस्याप्रखेंदुनालंब्रुनेत्रानंदे किमिंदुना॥ सा धीयप्रवरान्धीरसुधाशागरोदि-
ता॥ अथ पंकेलं विंनुश्वं द्वान्प्रसव चंद्रोतिरिच्यते॥ विबष्युवमानसतं प्रयाहि वि-
बयस्तूपप्रेयंवर्णनीयं प्रख्यातिं विबयिमोऽभेदेन रूपेण चविंबयस्यरंज-
नं रूपकं॥ अन्यरूपेणोरूपवतः करणात् तच्चकचित् प्रसिद्धविबयभेद-
वर्ण्यते॥ क्वचित्भेदे प्रतीयमानएव तद्धीयदा भ्रेशोपमात्रपूर्वं वसितं॥ तत
श्चरूपकं तावद्धिवि[illegible]धभेदरूपकं तादृक्परूपकमिति द्विविधमपिप्रत्ये-
कं त्रिविधं॥ प्रसिद्धविषयाभिव्यवर्णनेन तन्निगूनसवर्णनेना नुभयोत्या च एवं
रूपकंबद्धिधं॥ अथं हीसादिस्या धर्मलोके न तत्र भेदरूपकाणि॥ अस्याप्रखेंदु-
नेत्रादिसादृशोके नता [illegible] दृक्परूपकाणि चाभिव्यत्क्रमशान्भयो त्पुड्
शाक्रमवातिलोप्ये नोदाहृती नियेनदृश्याइति विशेषबोनवर्णनीये राज्ञि

को

प्रसिद्ध शिवाभेदान्तरं ज्ञानाद्विवस्य पूर्वविवस्यातो वर्णनीयः राज्ञ भावावस्या यां न्यूनत्वशाद्विक
तयोरवर्णनाच्यान्न भयाभेद रूपकं माद्यं ॥ एतदीपको यन बुद्धा नोत्तया पूर्वीवस्यां न्यून
तादर्शनान्न्यूनाभेदरूपकं द्वितीयं ॥ न्यूनत्ववर्णनमप्यभेद दार्ढ्योपादकत्वाच्च प्रस्ता
रकारि विषय महद्विवि तपरि यागेन तदुत्कर्षो तया शिवस्य पूर्वी वस्यातो वर्णनीय
8 राज्ञ भावावस्यायाम पूर्वविभाव नादधिका भेदरूपकं तृतीयं ॥ एव मुत्तरोत्तर
तादूप्यरूपकोदाहरणेष्वपि क्रमे[illegible]तान्न्यूनाधि[illegible]कभावा उन्नेयाः
अनेनैव क्रमेणोदाहरणानि ज्ञातव्यानि ॥ चंद्र ज्योत्स्ना विषदपुलिने सैक
तेस्मिन्सरय्वावादद्यूतं चिरतरं प्रभूतं सिद्धः पूर्वैः कथ [illegible] जितः ॥ एकोवं
सिन्धुः प्रमनि हतं वैदग्धं कां सप्रत्यस्तां सद्य कां प प य म ग व म कोहतस्ता
पूर्वं ॥ अत्र सत्व भिसनेन त कं सर्वैह मयो हंता योगरूढ ध्वजः सत्ता दास्ये

८

वर्णनीयस्य राज्ञः प्रतिपादनं प्रति कंसकेदमयोर्वचयोर्विपर्ययप्रश्नव्याजो
नतत्तादात्म्यदृढीकरणादरः॥ पूर्वावस्थातऽकार्षाव कर्षयोरविभावनाच्चा
नुमयामेदरूपकं॥ वेधाद्वेधाभ्रमं चक्रे कांतासु कनकेषु च॥ तासु तेषु
प्यनासक्तः साक्षात्तरमगोनराकृतिः॥ अत्र साध्व्यादि ति विशेषणेन विर
क्तस्य प्रसिद्धशिवतादात्म्यमुपदिश्यन राकृतिरिति दिव्यमूर्त्तिवेक
ल्यप्रतिपादनेनास्रनामेदरूपकं॥ क्व यातमपि तिवेपरत एष सिंधुस्व
सेतुमंथनरूपतः किमसौ विमेति॥ द्वीपांतरेऽपि न हि ते स्वव शं वदो
घत्वां राजपुंगव निषेवित एवलक्ष्मीः॥ अत्र तेसेतुमंथनादिति सेता
रमरतमंथन स्य च कर्त्तृरूपतामेन वर्णनीयस्य तादात्म्यमुक्तमात

क्रू॰

पापि तद्भागमनं सेतुबंधनाय मंथनायनेति समुद्रे पानमेतच्च द्वीपांतरगा
मपि तद्भुशं वद्धत्वेन पूर्ववत् द्वीपांतरे जेतव्याभावात् । प्राकृतधर्मीकत्वेन
मंथने प्रसत्त्याभावाच्चेति पूर्वाविस्यात उत्कर्षविभावनात् अधिका भेदरूप
कं । किं वक्त्रस्य रुचिं न हंति नयनानंदं विधत्ते न किं व्याद्धिं वा कुबकेतनस्य कु
रुते नालोकमात्रेण किं ॥ वक्त्रेंदो तव सत्यमयदपरः । शीतांशुरुज्जृंभते
दर्पस्याद्यतेन चेदिह तदप्यस्येव बिंबाधरे । अन्यापरः शीतांशुरिय
नेन वक्त्रेंदोः प्रसिद्धचंद्राद्भेदमाविष्कृत्य प्रसिद्धचंद्रकार्यकारित्वमात्रं प्र
तिपादनेन उत्कर्षापकर्षयोरदर्शनादभेदमयरूपत्वादूरूपकं ॥
अवत्सर्वदनो ब्रह्माद्धिवाहुश्वरो हरिः ॥ अभाललोचनः शरो महभगवा

न्त्वादृशायवनः॥अत्र ब्रह्मादावपुर इति विशेषणाद्विषयिताद्रूप्यमात्रवि
वक्षाविभावितं॥ चतुर्वदनत्वादिवैकल्यं चोक्तमिति न्यूनताद्रूप्यरूपकं॥
इदं विशेषोक्त्युदाहरणमिति वाच्यम् मतं यदाहुः एकगुणहानौ गुणसाम्यदार्ढ्यं अस्य ३
विशेषोक्तिरिति॥ किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसु
तामनः॥ मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥
अत्र दमयन्तीकृतचन्द्रोपालम्भे प्रसिद्धचन्द्रो न निर्याणकालिकमनः
प्रवेशभाक्ते तात्पर्यविषयः किन्तु नलमुखचन्द्र एवेति ततोऽस्याधिक्यप्र
तिपादनादधिकताद्रूप्यरूपकं॥ रूपकस्य सावयवनिरवयवत्वा
दिभेदप्रपञ्चनं तु चित्रमीमांसायां द्रष्टव्यं॥ परिणामः॥ क्रियार्थश्चेद्विष

यी विषया मता ॥ प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा ॥ यत्रारोप्यमा
णो विषयी किंचित्कार्योपयोगित्वेन निबध्यमानेस्तस्य तदुपयोगित्वा स्वतर
10 संभवात् ॥ प्रकृतार्थात्मतापत्तिमवेक्षते तत्र परिणामालंकारः ॥ तत्रो
दाहरणं ॥ प्रसन्नेनेति अत्राब्जस्य वीक्षणोपयोगित्वं निबध्यते न लुप्त
ः मयूरव्यंसकादिसमासेनोत्तरपदार्थप्राधान्यात् ॥ न चोपमितस
मासाश्रयणेन दृगब्जमिवेति पूर्वपदार्थप्राधान्यमस्तीति वाच्यं ॥ प्रसन्नेने
ति ॥ सामान्यधर्मप्रयोगादुपमितं व्याघ्रादिभिः सामान्याप्रयोग इति तद्प्र
योग एवऽपमितसमासानुशासनात् ॥ अब्जस्य वीक्षणोपयोगित्वं न
स्वात्मना संभवतीति तस्य प्रकृतदृगात्मतापरिणामस्य वक्षणात्परिणामा

५ पूर्वसमासो यद्गू रत्नमिदं न समासो द्वन्द्वः रत्नमिति नेयं

३ त लंकारः। यथा वातीसीमते शमौलिस्रज ममर ध्वनी मा मना सोतरतीयस मे सो मित्रि
मित्री मय म्रुपरुवा नातरं नाविकाय॥ व्या मग्ना ष्वस्तनीभिः शबर कुवतिभिः को
त्कोदंर्य दष्टं वृक्षुद्रु दुनी ममानः पतनाम च लम यो मित्र कूद्वयतं स्या॥ अन्ना
शेव्याम्ना। आतरः सौमित्रिमैत्री रूपताप सागर हो पका रत्नं पतनकायीव योगीन
स्वामना मद हस्यर चुनाये क्षसाद्यावे पकारे न त्रेतनाभिता या वाद्दितिवरिणामः॥
बहुर्भिबहुधोल्लेखादेकस्याल्लेख इष्यते॥ स्त्रीभिः कामो र्थिभिः स्वडुः कालः शत्रुभि
रिति सः॥ यत्र नानाविधधर्मयोग्यकं वस्तु तत्तद्धर्मयोगरूपनिमित्तभेदादने
केन ग्रहीत्रानेकधोल्लिख्यते तत्रोल्लेखः। अनेकधोल्लेखनेरुच्यर्थि सम या दिके
यथार्हं प्रयोजकं रुचिरं भिरतिः अपि संलिप्सां। स्त्रीभिरिसा सुदहरको॥ अत्र एक
एव राजा सौंदर्यवितारणपारात्क्रमशालीति स्त्रीरुभिरर्थिभिः प्रतर्पनिश्च च्यर्थि

२ नयं मिति॥ रु१

कु०

समर्थैः कामकल्पता रूकालरूचोद्दृष्टः ॥ यथावा ॥ मडात्रां तेति रधात्रिः श्रीवर्तित इति यो
वतीः । यथास्थितस्वबाला त्रिर्दृष्टः शौरिः [illegible]ः स्वकौस्तुभं ॥ यस्तपाणीतं मत्तंगजेश्वर
पानायवतेस्मसाम्रमाद्री उरुबोतम इति वच्छ्री त्रिः संसारमीत्रातद्भयार्थिनीत्रिः
॥ रुक्षो यं मधुरापुरं प्रविशदृष्टः यस्तपाच्यं चलसेन प्रसिद्धा याः स्त्रियोपि कामोप
चारवैदग्ध्येन निर्यवक्तुमः श्रायं हि व्ययुवेति युवतिसमूहैः सोत्कंठं दृष्टं बालाति
स्त्रुवाल्यगतारूपवेषालंकारदर्शनमात्रलालसापि यं पावस्थितवेषा हि युक्तो दृष्टः
इतिवहु [illegible] धोल्लेखः पूर्वं कामलाद्यारोपरूपकसंकीर्णः अयं तु शुद्ध इति भेदः
एकेन बहुधोल्लेखो यासौ विषयभेदतः ॥ गुरुर्वचस्यर्जुनोयं कीर्तौ भीष्मः शरा
सने ॥ गृहीतभेदाभावेपि विषयभेदाद्बहुधोल्लेखनादयं सांख्योल्लेखः उदाहरणं श्लेष
संकीर्णं वचोविषयेऽमहानृपश्चेरि सिवर हस्पतिरिसा हौ धौ तरस्यापिक्रोडीक

रणात्।। भेदो यथा।। अकृशं कुचयोः कृशं विलग्ने विपुलं चक्षुषि विस्तृतं नितंबे।। अधरेऽरुणमा
विरस्तु चित्ते करुणाशालि कपालिभागधेयं।। स्मृतिभ्रान्तिसंदेहेषु तद्
कालंकृतित्रयं।। पंकजं पश्यतः कान्तामुखं मे गाहते मनः।। अयं प्रमत्तमधुपस्त्वन्मुखं वे
त्ति पंकजं।। पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः।। स्मृतिभ्रान्तिसंदेहैः सा
दृश्यानिबध्यमानैः स्मृतिमान् भ्रान्तिमान् संदेह इति स्मरणादिपदांकितनामलंकारत्रयं
भवति तत्र क्रमेणोदाहृतं।। यथा वा।। दिव्यानामपि कृतविस्मयां पुरस्तादंभस्तः स्फुरदरविंदचा
रुहस्तां।। उद्वीक्ष्य श्रियमिव कांचिदुत्तरंतीमस्मार्षीज्जलनिधिमंथनस्य शौरिः।। एवं स्मृतिम
दुदाहरद्वौ सदृशस्यैव स्मृतिः।। अन्यस्य सदृशधर्मी स्मरति एवं कुंतासंबंधिनो जल
निधिमंथनस्य विस्मृतिरिति भेदः।। पलाशकुसुमभ्रान्त्या शुकतुंडे पतत्यलिः।। सोपि जं
बूफलभ्रान्त्या तमलिं धर्तुमिच्छति।। अत्रान्योन्यविषयभ्रान्तिनिबंधनः।। एवं स्मादि

कु॰

शेषः ॥ जीवनमरहजे नमस्त्र रहीनाः पुनरुस्थिताः ॥ किं कनिष्ठाः किमु ज्येष्ठाः घटीयंत्रस्व
दुर्जनाः ॥ पूर्वोदाहृते संदेहः प्रसिद्धकोटिकः अयं तु प्रसिद्धकोटिक इति भेदः ॥ अथ
० अपह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ॥ नायं सुधांशुः किं तर्हि व्योमगंगासरोरु
१२ हं ॥ वर्णनीयवस्तुनि तत्सदृशधर्मारोपकल्पकसादृश्यधर्मनिह्नवः कविमति
विकासोपकल्पितधर्मान्तरस्यापि निह्नवः यथा वा ॥ अंकं केपि शशंकिरे जलनिधेः
पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे ॥ इंदौ यद्दलितेंद्रनी
लसकलश्यामं दरीदृश्यते तत्सांद्रं निशि पीतमंधतमसं कुक्षिस्थ[illegible]मालोक्यते ॥ अत्रो
त्प्रेक्ष्य धर्मात्मकमप्यपह्नवः परपक्षत्वोपन्यासादर्थसिद्धः ॥ स एव युक्तिपूर्वश्चेद्धेत्व सुपह्नुप
तिर्हेत्वपह्नुतिः ॥ नेन्दुस्तीव्रो न निश्यर्कः सिंधोरौर्वोयमुत्थितः ॥ अत्र चंद्र एव तीव्र पह्नवरूपेति

वन्नैशिकयुक्तिभ्यां चंद्रत्वस्य सूर्यत्वापह्नवो वडवानलत्वारोपार्थः पर्यायवा ॥ मंथानभूमिध
रमूलशिलासहस्रसंघट्टनव्रणकिणाः स्फुरंतींदुमध्ये। छायापरमृगः शशकइयतिपा
मरोक्तिरेषां कर्णं चिदर्पितापि हि न प्रसक्तिः ॥ अत्र चंद्रमध्ये मंथनकालिकमंदरशिलासं
घट्टनव्रणकिणस्यैव छायाऽदीनां संभवो नास्तीति छायापह्नवः। पामरवचनेन
लोपन्यासेनाविष्कृतः ॥ अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः ॥ नायं सुधांशुः
किंतर्हि सुधांशुः प्रेयसीमुखं ॥ यत्र कुचिद्वस्तुनि तद्धर्मनिह्नवः अन्यत्रवर्णनी
येवस्तुनि तस्य धर्मस्यारोपार्थः पर्यस्तापह्नुतिः ॥ यथा चंद्रे चंद्रत्वनिषेधो वर्णनी
येवस्तुनि प्रेयसीमुखे तदारोपार्थः पर्यायवा ॥ हालाहलो नैव विषं विषं रमाजनाः प
रं व्यत्ययमत्र मन्वते ॥ निपीयजागर्ति सुखेन तं शिवः स्पृशन्निमां मुह्यति निद्रया
हरिः ॥ पूर्वोदाहरणे हेतूक्तिर्नास्ति ॥ अत्र तु स्पास्तीति भेदः ततश्च पूर्वापह्नुतिवैत्रा ८१

कु

पिद्धे प्रविध्य प्रतिद्धरव्यां ॥ भ्रांतापह्नुतिरन्यस्य शंकायां भ्रांतिवारणे ॥ तापं करोति सो
त्कंपं ज्वरः किं न सखि स्मरः ॥ अत्रेदं तापं करोतीति स्मरवृत्तांते कथिते तस्य ज्वर
साधारण्यात् का ऽऽबुध्या सख्या ज्वरः किमिति पृष्टे सखि स्मर इति तत्त्वोक्त्या भ्रांति
वारणं कृतं ॥ यथा वा ॥ नागरिक सम धिकोन्नतिरिह महिमा भ्रांतः कोऽपि मयूरः
13 पुष्पः ॥ न हि न हि करिकल्लभो यं भृंगाद्दं डोयमस्य नक्षत्रुपुंश्च ॥ इदं संमयवत् भ्रांति
कृविकायां भ्रांतापह्नुत्या उदाहरणं ॥ कल्पित भ्रांतिपूर्वा यथा ॥ जटाने यं वेणी
कृतकचकलापो न गरलं गले कस्तूरीयं शिरसि शशिरेखा न कुसुमं ॥ इ
यं भूतिर्नांगे प्रियविरहजन्मा धवलिमा पुरारातिभ्रांत्या कुसुमशर किं
मां व्यथयसि ॥ अत्र कल्पित भ्रांतिर्जटाने यमित्यादि निषेधमात्रेणोक्त्या ॥ पूर्वं व
स्वभावात् इदं हि तत्र तत्त्वाख्यानोपक्रमं रूपमात्रभेदं मेने ॥ पदं ॥ नपहं

×अङ्कुता३

स्वप्नेवेदं न ×रंगो वष्ठ्वबीड्मे॥ इति विस्पष्टसाहृश्यात्तथाख्यानोपमामतोत्ति

॥छेकापह्नुतिरन्यस्य शंकातस्त[illegible]निह्नवे॥ प्रजल्पन्मत्पदे लग्नं कान्तः किं नहि नू

पुरः॥ कस्यचित् किंचित्प्रविरहस्योक्तावन्येन श्रुत्वा उक्तौ सा पर्यायान्तरवर्णनेन तस्य

निह्नवे छेकापह्नुतिः यथा नायिका यामेन सखीं प्रति॥ प्रजल्पन्मत्पदे लग्नमिति

स्वनायकस्य तातो निवेद्यमाने तद्वाक्यं श्रुत्वा कान्तः किमिति शंकितवतीं तां

प्रति नहि नूपुर इति निह्नवः॥ यथा वा॥ सीत्कारं शिक्षयति व्रणय सधरं तनोति

तिशैमं चं॥ नागरिकः किं [illegible] मिलितो नहि नहि सखि हेमन्तपवनः॥ इदमर्थ ×शिक्षते

योजनया तथा निह्नवे॥ उदाहरणं शब्दयोजनया यथा॥ पद्मेवनु यनेस्म

×निरीक्ष्य रास्मि सततं भावो भवत्कुंतलले नीले भ्रश्यति किं करोमि हितैः क्रीतोस्मि ते वि

भ्रमे॥ इत्युक्त्वा प्रवचोनु मौढ्यसरूवानिर्भर्सितो राघवे वाक्यं समस्त प्रेव मि२

ॐ

तन्व्यवीक्षणान्नीडाविटःपाण्डवः॥ सर्वमिदं विजयांतरयोजने उदाहरणं॥ विपक्षै
२ ब कोपव्यं स्यामेदेन योजने यथा॥ वदंतीजारवृत्तांतं पत्यौ धूर्त्ता सखीधिया॥ पतिं
बुद्ध्वा सखि ततः प्रबुद्धा स्त्री सत्कर यत्र॥ कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः
पदैः॥ निर्यांति स्मरनाराचाः कांताहृग्यातकैतवात्॥ अत्रासरसामिषापिना
कैतवपदेन नेत्रे कांताकटाक्षाः किल स्मरनाराचा इत्यपह्नवः प्रतीयते॥ यथा
वा॥ रिक्तेषु वारि कथया विपिनोदरेषु मध्यान्हो ऽभित महातपतापतापः॥ वर्द्धितैः
स्कंधांतरोषितदवाग्निशिखाछलेन डिंडुप्रसार्यते रवोजनमेर्थयते॥ से
० प्रावनास्याद्रुद्रुथावस्तु हेलफभामना॥ उत्तानुक्तोस्पदाद्यात्र सिद्धासिद्धास्प
द्दपदे॥ धूमस्तोमं तमःशंके कोकीविरहशुष्मणो॥ लिंपतीव तमोंगानि वर्षती
तीवांजनं नभः॥ रक्तौ तवांघ्री मृदुमलौ भुवि विक्षेपणात् ध्रुवं॥ स्त्रमुखामेंदु

यान्न नंपक्षे वैशायते ॥ मध्ये किं कुयो (य) पोर्ध्वदेशे बद्धः कनकदामभिः॥ प्रायो बंत सदे
नैक्यं प्राप्नुंतो येत्तत्र स्यति॥ अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनं प्र
त्रेषा सा वस्तु हेतु फलाभगोचरत्वेन त्रिविधा॥ अत्र वस्तुनः कस्यचिद्धर्मांतरतादात्म्य
संभावना प्रथमा स्वरूपोत्प्रेक्षेत्युच्यते॥ अहेतो हेतुभावेनाफलस्य फलत्वेनोत्प्रेक्षा
हेतूत्प्रेक्षा फलोत्प्रेक्षेत्युच्यते। अत्राद्या स्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया चे
ति द्विविधा॥ परे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषया चेति प्रत्येकं द्विविधे॥ एवं
षण्णामुत्प्रेक्षाणां धूमस्तोमेत्यादिना क्रमेणोदाहरणानि॥ रजनीमुखे सर्वत्र विस्त
३ वरस्य तमसो नैल्यं दृष्टिप्रतिरोधकत्वादिधर्मसंबंधेन गम्यमानेन निमि
त्तेन सद्यः प्रियविघटीतसर्वदेशस्थितकोकांगनाहृदयगतदुःखलिप्सुविरहा
नलधूमस्तोमतादात्म्यसंभाव[illegible]विषयस्यापाद्यानादुक्तवि

कु०

३ अनुक्तविषया

षयात्तमोव्यापनस्य नभःप्रभृति प्रवर्तितसकलवस्तुसांद्रमलिनीकरणेन निमित्ते
न तमःकर्तृकलेपना तादात्म्योत्प्रेक्षा नभःकर्तृकाञ्जनवर्षण तादात्म्योत्प्रेक्षा चानुक्त
विषयास्वरूपोत्प्रेक्षा। उभयत्रापि विषयभूतस्य तमोव्यापनस्यानुपादानात् नन्वेतम
सो व्यापनेन निमित्तेन लेपनकर्तृ तादात्म्योत्प्रेक्षा नभसो प्रवर्तितगाढनीलिमव्याप्ति
रूपेण निमित्तेनाञ्जनवर्षणकर्तृ तादात्म्योत्प्रेक्षा चेति। उत्प्रेक्षाद्वयमनुक्तविषयमेवा
स्तु मैवं लिम्पतीव वर्षतीत्याख्यातयोः कर्तृवाचकत्वेपि भावप्रधानमाख्यातमिति स्मृ
दु५८ तेर्धात्वर्थक्रियाया एव प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्तुरुत्प्रेक्षाविधायतया
न्यत्रान्वयासंभवात्॥ अत एवाख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्यत्रा
न्वयासंभवादेव हेतोः स्वस्योपमायामुपमानतयान्वयो दंडिना निराकृतः कर्ता
अप्रधानभूतस्य यद्युपमानं स्यान्न्यग्भूतोसौ क्रियापदैः स्वक्रियासाधनव्यग्रो नालमन्य[illegible]द्व्यपेक्षि

वि प घो १ रध्यु मेत्रि न १

दमिति॥ कश्चित्। तमोनमसौ स्तत्कर्तृकलेवर्वर्जस्वरूपध मेक्रिश्से साहं: तन्म
तेस्वरूपोपेत्त्वा याध्यप्रयु प्रेक्षां च पुनं द्रे विध्यं दूरष्यं॥ चरेत्त यो स्वतः सि
द्धरत्मिमनिवस्तुतो विद्धेपक्षं न हेतुरिति अहेतो स्तस्य हेतुत्वेन संभाव ना हेतुरूपमा
हेतुत्वेक्षां नि थेपनस्य विषयस्य सत्ता सिद्धविषया पंडुपन्न विरोधे स्वा
भाविकेना पि का वद्धकोन्नेति प्रेरवसानहेतुरिति तत्र नहेतुत्वसंभा हेतुरूपता संभावना
वना हेतुत्वेक्षां वस्तुतस्तदिच्छा या अनावाद् सिद्धविषयो मध्यः स्वप
मेवकृत्वो धरति नलकन कुदामवद्धत्वे नाध्याव सिताया व. लीत्र वशा
लिताया वे ध्याद् इति प्रध्यकर्तृककु च ध्व तेस्त फलत्वे मो ह्रेक्षा सिद्ध विष

कु॰ वसंतनायकसमागतवनस्थलीसंबंधि ६
पाकलोहितेथा॥ तनजास्य जालीनतावस्थितेरुद्वासतवस्त्रेनाध्यवसतायाः कामिनीच
रणसाध्यप्राप्तिर्नकलमिति तस्या गगनकुसुमोपमानायास्तु पुनः कालेनोद्भेद
थाबौ अशिद्धबिंबपाकलोहितेथा॥ अनेनैव क्रमेणोदाहरणांतराणि॥ ॥बालेंदुव
16 क्राण्यविकासभावाद्बभुः पलाशान्यतिलोहितानि॥ सद्यो वसंतेन समागता
नां नखक्षतानीव वनस्थलीनां॥ अत्र पलाशमुकुलानां वक्रत्वलोहित्यसंसो
बंधेननिमित्तेन सद्यः कृतनखक्षतताद्रूप्यसंभावना उत्प्रेक्षा विषया स्वरू
पोत्प्रेक्षा था॥ पूर्वोदाहरणे निमित्तभूतधर्मसंबंधो गम्यः इह तु वाच्य इति भेदः॥
नलिवशब्दस्य सादृश्यपरत्वेन प्रसिद्धतरत्वाद्धर्मो वाच्यो लिंपतीवेत्युदाहर
णे लेपनकार्यरूपमानसादृश्यक्रियोपसर्जनत्वं न त्वत्र हि नखक्षतानामन्या
वसर्जनत्वस्योपमाबाधकस्याभावात् उच्यते। उपमायां यत्र क्वचित्स्थिते

रविनखक्षतैः स्फुटवसुं शुचमात यावसीतनायकसमागत वनस्थली संबंधिवस्य विशे
षकस्यानपेक्षित तया दिहतदुपादानं पलाश कुसुमकुलानी नखक्षत तादात्म्य संभाव
नायामिवशब्दः प्रवेश्यापयतीति तथा च एव तुहिनशोषण साफल्यात् अस्ति च संभा
वनायामिवशब्दः दूरेतिरं देवदत्त इव भातीति ॥ ॥ विनष्टीवत रं गाङ्गैः समुद्रः
फेनचंदनं ॥ तदा दाप करे रिंदुर्लिंबतीव दिगंगनाः ॥ अत्र तरं [illegible] गाङ्गैः फे
नचंदनस्य प्रेरणे पवन तया प्रेक्ष्यते समुद्रादुत्थितस्य चंद्रस्य प्रथमं समु
द्रकूरे प्रसृतानां कराणां दिक्षु व्यापनं च समुद्रोपांत्तफेन चंदनलक्ततालि
पनेनोत्प्रेक्ष्यते ॥ ३ ॥ अयत्र क्रमेण समुद्रप्रांतागतफेनचंदनकुंजीभावेन दिशी
धवलीकरणं च निमित्तमितिफेनचंदनप्रेरणं किरणव्यापनयोर्विषय
जोरन्यापादानादनुक्रमविषये स्वरूपाप्रेक्ष्योपेबांत पातात्वोः समुद्रचंद्रयोरेव

कु.

तकर्द कचेबगले पनरूवधर्मोत्रि श्चेति मतं तेवां मतोऽवैदाइरणे धर्मिणि धर्म्मेन रताहा म्भो
ह्येष्वाइहत्र धर्मेप्रिभिधर्म्मसंसर्गो त्रि श्चेति भेदो वगंतव्यः।। ।।७।। रात्र्यौ रवेर्हि वा चेंदोरग्रा वा
दिवसः प्रभुः।। भूमौ व्रताव वससीसस्वव्रान्हे सन्ततो द्वितो।। रात्रौ रवे र्हि वा चंद्रस्या मा
वः सन्नपिवृत्ताव वशः।। सर्गेन हेतुरितित स्यत द्वे संभावना सिद्ध निवयाहे
कृते धत्ता।। विवस्वता नोऽथ विवर्तेव भिश्राः स्वगो सह स्वेदनो समं डनानां।। गावोविनि स्त्रा
यरनामधेयास्तो नेदग्रां ध्वांस्वल्पे नाधकारैः।।।। अत्र विवस्वता कृतं स्व
किरणैः सहडानलो यमानां नवनप्रसदेव रात्रा वाध्यं प्रतिहेतुत्वेनोक्तेश्चतइति अस्मि
द्रविवयाहे तुवेश्या।। ।।दूरे विप्रवर्व द्वितिरेव योधैः शंको यस्मै प्राकमर्षिं किं यंति
।।वयांसि द्रोग्धिप्रियविप्रयोगे शशोकको कीनयनेकियंति।। अत्र चंद्रप्रवृत्तं
सम्‌द्रुस्यंरहर्वा सहेवतद्दातेन कृतस्य चंद्रकांतझावबास्य कोकीगमनाबाध

नीता
इव ५

सिद्धविषयाफलोत्प्रेक्षा १

आवरणस्य चकलत्वेनोत्प्रेक्ष्यत इति सिद्धविषयाफलोत्प्रेक्षा ॥ ॥२ पुञ्जितानां च
रिवर्तनायपुरातनो नाम्निवंवाहनानां ॥ उन्नतिश्रमोदरमोतमानां द्विशिखरतश्चेर
विरूतरस्यां ॥ अत्रोत्तरायणस्यैव परिवर्तनमस्य देवकलत्वेनोत्प्रेक्ष्यत इति सिद्ध
विषयाफलोत्प्रेक्षा ॥ एतास्वोत्प्रेक्षा ॥ मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः ॥ इत्युत्प्रेक्षाव्यंजकत्वेन परिगणितानां श
ब्दानां प्रयोगे गम्योत्प्रेक्षा ॥ यथा ॥ त्वत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगां ॥ रू
पकातिशयोक्तिः स्यान्निगीर्याध्यवसानता ॥ पश्य नीलोत्पलद्वंद्वान्निःसरंति उ॰ दृ॰ ति॰ ५
शिताः शराः ॥ विषयस्य स्वशब्देनोल्लेखनं विनापि विषयवाचकेनैव शब्देन
ग्रहणं विषयिनिगरणं तादृशं विषयस्य विषयिरूपताध्यवसानमाहार्यनि
श्चयः तस्मिन्सति रूपकातिशयोक्तिः ॥ यथा नीलोत्पलशरशब्दाभ्यां लोच

कु

नयोः कृतार्थक्षीणां च गरुडमारुर्वकं तद्वदत्ताध्यवसानां यथा वा ॥ वापीका विस्फुरति ग
गनेतवरे स्फुरद्वपद्मसोपानालीमधिगतवतीकांचनीमिंद्रनीलैः ॥ अग्रेशैलौ सुकृति
कु॰ स्वगम्यौ चंद्रनच्छन्नदेशौ तत्वयानां स्तनभ्रममूलं संनिधानाद्दधानौ ॥ अत्र वाप्या
दिशब्दैर्नाभिप्रभृतयोऽभिनिगीर्णाः ॥ अत्रातिशयोक्तौ रूपकविशेषणं रूपकेहशि
तानांविधानामिहापि संभवोस्तीत्यतिदेशेन प्रदर्शनार्थे तु नात्राप्यभेदातिशयो
क्तिरस्त्वाह्नपातिशयोक्तिरिति द्विविध्येन नाप्याधिक्यान्तरता द्विविभागश्चेति सर्व
मनुशीध्येयः ॥ यथा वा ॥ सम्पाव्रज्जमासे रुच वनं च कोरैरनुस्रतः क्षिरनर्ज्यो
स्नामच्छं न वलवल्लिवाकव्रणपिनीं ॥ उपजाकाराम्रेविहिछेन यनेतकं यमना
गेनाकाशेकौर्यं मगलितहरिणः शीतकिरणः ॥ अत्र कौयं गलितहरिणत्वाद्युक्ता
प्रसिद्धचंद्राद्भेदः तत उत्कर्षश्चागमितः एवमन्यत्राप्यूहनीयं। यद्यपं हुतिग

हेतुकार्ययोः

दलितानि ॥ अक्रमातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे ॥ अग्रे मानो गतः पश्चादनुनीता

प्रियेण सा ॥ यथा वा ॥ कवीन्द्राणां मानसवृत्त्यमन्तरप्रेयांगनास्तुव श्चलैरंगासंगाकूलकीर ६२

मदामोद मधुकराः ॥ अमी पश्चात्ते वासुपरि पतितास्तु नरपति कटाक्षाः ॥ क्षीरोद प्रसर दुकूल वीची

सहचराः एता क्लिष्टा अतिशयोक्तयः कार्यशीघ्रत्व यथार्थः वर्ण्यानामितरेषां वा धर्मै

कतुल्ययोगिता ॥ संकुचंति सरोजानि स्वैरिणी वदनानि च ॥ इन्दुमाईरेदृष्टकस्य ०

चित्तं न भासते ॥ मालती शशभृल्लेखा कदलीनां कठोरता ॥ प्रस्तुतानामप्रस्तुतानां वा गुण

क्रियारूपैकधर्मान्वयः तुल्ययोगिता ॥ संकुचंतीति प्रस्तुततुल्ययोगिता या मुदा

हरणं तत्र प्रस्तुत चंद्रोदयकालीनत्वात् वर्णनीयानां सरोजानां प्रकाशो स्वैरिणी

वदनानां च संकोचरूपैकक्रियान्वयो दर्शितः ॥ उत्तरश्लोके नायिकायोक्तमार्यवर्णने

प्रस्तुते अवर्णनीयानां मालत्यादीनां कठोरतारूपैकगुणान्वयः ॥ यथा वा ॥

सञ्जातपत्रप्रकरान्वितानी समुद्वहंति स्फुटपाटलत्वं ॥ विकस्वराण्यर्ककराभिमर्शा

चंद्रोदयका लिकत्वात्व लीनसरोजस्व रोदयवर्ण नरूपत्वात्

कु॰

1 हृन्नानि वस्त्राणि च वर्द्धमानीयुः॥ नामैं द्वहसास्त्रविकर्कशसाद्विकां नश्यो सास्कन्दलीविशेषाः लब्धा
विलोके परिबाहिरूपं जातास्तद्वैरूप्यमानबाह्याः॥ अत्र गीष्मवर्णने तद्वीर्येर्न प्रस्तु (तुल्यातिरेकेन)
तानां दिनानां वस्त्राणां चरकक्रियान्वयः॥ उरूवर्णने अप्रस्तुतानां करिकराणां कदली
नां चैकगुणान्वयः ....॥ हिताहितेव्यतिरेकतो ल्य प्रवरा तुल्ययोगिता॥ व्रतीयते व
रा प्रभृतिभिर्मित्रशात्रवयोस्तुल्या॥ अत्र हिताहितयोर्मित्रशात्रवयोरुरूप प्रतिशमनस्य
२० वराभवदानस्य चाश्लेषे बेधा भेदाध्यवसायाद्व्यतिरेकतो ल्यं पथावा॥ पश्चात्तिं बंपर
भ्रुनायश्चो नं मधुसर्पिषा॥ पश्चोनं गंधमाल्याद्यैः सर्वस्य कटुरेव सः॥ अत्र वा
श्चतिसिंचति अर्चतीत्यध्याहारैर्वाक्यानि पूरणीयानि। पूर्वोद्वाहरणं स्तुति
पर्यवसायि इदं निंद्यापर्यवसायि वशायीति भेदः॥ इयं सरस्वतीकंठाभरणोक्ता तु
ल्ययोगिता॥ गैरबोस्तु एषः- समीक्षत्व वचो न्यात तुल्ययोगिता॥ लोकपालो यमः पा
शी श्रीदः शक्रो प्रबानेपि॥ अत्र वर्णनीयो राजा शक्रादिभि

धर्मस्य वर्ण्यो वार्ण्यगतत्वाद् उक्तचित्रलक्षणे तस्यार्थः

न्ये यस्त्ववसं वर्त्तिरन्यावै दुग्धधौरणी॥ नैष्वानलिनवचा श्रीस्त्रं विः साधारणी
विद्येः॥ संबं [illegible] धाति शयोक्तिः स्यादद्योजे योगकुल्यनं॥ सोधा [illegible] निष्करस्यास्य १२
स्त्रु शंतिविधुमंडलं॥ यथावा॥ क्वतिपयदिवसैः क्षयंवक्त्या यात्रकनककगिरिः
कृतवासरावसानः इतिमुहे [illegible] मुवाति च चक्रवाकीवितरणशालिनि
वीररुद्रदेवे॥ अत्र चक्रवाक्याः सूर्यास्तमनापकारकमहामेरुधारणसंभाव
नाप्रयुक्तस्यं तोषासंबंधेपि तत्संबंधोवर्णितः यजेष्व योगः संबंधातिशयोक्ति
नाप्रस्तुतस्यं तोषासंबंधेपि तत्संबंधोवर्णितः॥ अत्र खड्गमयूरादरसेवित
श्रीयतिहृ॥ तु यिदातरिराजेंद्र स्वर्गंडुमान्नादृिपामहे॥ अत्र खड्गमयादरसेवित
हसंबंधोवर्णितः यथावा॥ अनयोरनवद्यांगिस्तनयोर्जृंभमाणयोः अवकाशो
नपर्याप्तस्तव बाहुलतांतरं॥ अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आ

कं०

लिंगति सम्यङ्क्वचित्यां शशाङ्क परावर्तते ॥ अत्र यदा प्रियायां शरसंधानं तदा नीप्रवशत्रवः
स्थितो वदन्तीति हेतुत्वकार्ययोः सहभाव वर्णितं यथावा ॥ कुंचति कुंचति कोशं भजति
च भृङ्गेति प्रकंपमर्थ खर्ग हमीरवीर खड्ग राजति राजति धरा प्राप्तु ॥ अत्र खड्ग
स्य कोशात्यागादि कालएव परिपूर्ति धनमदयागादिः वर्णितिः ॥ यथावा ॥ चैव
नातिशयोक्ति स्तु कार्य हेतु प्रसूतिजो ॥ यास्या मी सुदितेतन्यावलयो मनद्
र्शिका ॥ अत्र नायकचध्वास पुष्पं कि मात्रेण वाबितोति कार्य कार्य मुखेन दर्शि
तं यथावा ॥ आद्यातुं सक्त दृष्टीधीर्यलिते पिकस्तु मेह स्वागमनालो हितं लोषारंजन
वार्तयापि सहस्रा रक्तं तलं पादयोः ॥ अंगानामनुले पनस्मरणमप्यहो दाव
हंहं ता धीर दृशः किमन्यहन्त कामोद्योपि भारायते ॥ यथावा ॥ पामिनयामीतिध
वैव द्वतिपुरस्तात् रथपो नतन्वंग्याः ॥ गलितानि कूरे वलयान्यपरा व्यथितबेव

लौकिकपालस्येन समीकृतः यथा वा संगतानि मृगाक्षीणां तडिद्विलसितान्यपि ।। क्षणद्व
यं न तिष्ठन्ति घनारब्धान्यपि स्वयं ।। पूर्वत्र स्तुतिरिह निन्दा इयं कान्याद्दृष्टिरिति ।। दृ
ष्टान्तस्य योगितां सिद्धिरिति केचिदाचक्षते यदाह जयदेवः सिद्धेः ख्यातेषु चेन्नाम कीर्त्यते
तुल्यतोक्तये वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ।। मदेन भाति कलभः प्रतापेन
महीपतिः ।। प्रस्तुतानामप्रस्तुतानां चैकधर्मान्वयो दीपकं यथा ।। कलभनरपाल
योः प्रस्तुताप्रस्तुतयोर्भातिक्रियान्वयः यथा वा मणिः शाणोल्लीढः समरविज
यी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।। कलाशेषश्चन्द्रः
सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ।। अत्र
प्रस्तुतानां नृपाणां अप्रस्तुतानां मण्यादीनां शोभैकधर्मान्वयः प्रस्तुतेकनि

शालाप्रस्तु
तिकथंःक
यद्दृष्टपरः

कु॰ ... स्तुतस्यैव प्रथमे धर्मान्वयः ४२ अत्यैकचकारोनेरपक्षद्योतकः दी

भिन्नः समानो धर्मः प्रसंगाद् अत्रोपकरोति प्रासादार्थमारोपितो [illegible]वोऽर्थ्या यामिनन्दी
वसादृश्याद्दीपकसंज्ञायां [illegible]ती वार्थेऽकून प्रत्ययः यद्यपि स्व [illegible] वृत्ति वीचिन्व
स्व तिप्ररूपा[illegible] यः॥ ४२ श्रवकृतविद्याभ्रु यश्चजा[illegible] नातिसे विलं॥ इ स नव प्रस्तुता प्रस्तुता
कर्मप्रकुलतया वर्णनीयधत्त मित्येतदर्थः नो प्रागवधर्मान्वयः॥ तथापि प्रसंगिकत्वं न हीयते। वस्तुगत्या प्रस्तुतोद्देशेन प्रव
त्तस्यैव वर्णनेऽस्याप्रस्तुते [illegible]न्वयात् नहीदीपस्वरसंख्या प्रासादयोर्गव
२२ दुपकारत्वेन [illegible]मात्रार्थभिपित स्य स्व पस्यातिपियर्थः प्रथमपरिवे ब्धोत
नच प्रासंगिकत्वं हीयते तेन्वयोगितायां चेकं प्रस्तुतमन्यदप्रस्तुतमिति वि
शेषाग्रहणात् स्वोद्देशेनेव धर्मोऽस्तीति विशेषः॥ ४३ यं चानयोरवशे वि
शेषः॥ ३ मयोरनयोरुपमालंकारस्य गम्यत्वावि शेषेऽपि ४३ गाप्रस्तुतमुपमानं प्रस्तु
तमुपमेयमिति व्यवस्थितं उपमानोपमेयभावस्वाव्रत्ते विशेषाग्रहणाद्दे छिकाः स २२

[illegible]

इतित्रिविधं दीपकावृत्तो भवेदावृत्तिदीपकं । वर्षत्यम्बुद मालेयं वर्षत्येषा च सर्वरी ॥ उन्मीलं
ति कदंवानि स्फुरंति कुटजोद्गमाः ॥ माद्यंति चातकास्तृप्ता माद्यंति च शिखावलाः ॥ दी
पकस्थानेकोपकारार्थतयादीपस्थानीयस्य शब्दस्यार्थस्य वा पुनर्योर्वा आ
वृत्तौ त्रिविधमावृत्तिदीपकं ॥ क्रमेणोदाहरणानि ॥ पवीधा ।
उत्कंठयंति मेघानां मालावर्गं कलापिनां ॥ यूनां चोत्कंठयत्यद्य मानसं मक
रध्वजः ॥ शमयति जलधरधारा चातककांतैनों रुचिरोपनतं ॥ श्रपयति च
वर्धलोचनजलधाराकामिनां प्रवासरुचिं ॥ वदनेन निर्जितं तव निलीयते
चंद्रबिंबमंबुधरे ॥ अरविंदमपि च सुंदरि निलीयते पाथसां पूरे ॥ एवं
चावसीनां प्रस्तुतावस्तुतोभयविषयत्वा भावेपि दीपकच्छायापत्ति ॥ इति मा

ॐ

४ धर्म४

त्रगद्दीपकवद्दृशः॥ वाक्ययोरेकसामान्ये प्रतिवस्तूपमानता॥ तापेन ०
भ्राजते सूरः शूरश्चापेन राजते॥ यत्रोपमानोपमेयपरवाक्ययोरेकः सा धर
धारणो धर्मः पृथङ् निर्दिश्यते सा प्रतिवस्तूपमा॥ प्रतिवस्तु प्रतिवाक्यार्थं
स४ उपमानसमानधर्मोऽस्यामिति व्युत्पत्तेः यथात्रैव राजत इत्येकः पृथगुपमानो
पमेयवाक्ययोः पृथङ् निर्दिष्टः यथा वा॥ स्थिरा शैली गुणवतां
खलबुद्ध्या न बाध्यते॥ रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते॥ यथा वा
तेवामृतस्य हि निपाद्य बंके जो निवेशिता मा कथमन्यदिच्छति॥ स्थितेऽपि विं
द्रमकरंदनिर्भरे मधुव्रतो न श्वरसं हि विद्यते॥ अत्र यद्यप्युपमेयवा २२
क्ये अनिच्छा उपमानवाक्ये अविद्योतिधर्मभेदः प्रतिभाति। तथापि विवक्षया

मात्रस्यावर्णनीयस्य प्रतिबंधानईयापूर्वकंवीक्ष्यावृत्तिबंधो यमनिष्ठा
पर्यवसितत्वेति धर्मैक्यमनुसंबंधेयं ॥ अथावृत्तिः प्रस्तुतानां प्रस्त
स्तुतानां वा प्रतिवस्तूपमालुप्रस्तुताप्रस्तुतानामितिवि॥शेषः अयं चा
परो विशेषः आवृत्तिः दीपकं वैधर्म्येण भवति प्रतिवस्तूपमा तु
वैधर्म्येणापि दृश्यते । यथावा ॥ वि[illegible]मेव यदि जानाति विद्वज्जनैक द्वा
रिञ्जं प्रं ॥ नहि विद्यया विना ज्ञातिं गुर्वी प्रसव वैदूनां ॥ यदि संतिगु
गुणाः पुंसां विकसंत्येव ते स्वयं ॥ नहि कस्तूरिकामोदः शपथेन
विभाव्यते ॥ चेदं वैधर्म्यप्रतिबिंबनं दृष्टांतस्तु दलनं वृत्तिः ॥ एवमेव ०

ॐ

५

कीर्तिप्रतापौ राजन् विधुरे च हि कान्तिप्रतापौ ।। यत्रोपमानोपमेयवाक्ययोर्वि-
म्बावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिश्येते स दृष्टान्तः ।। इमेव कीर्तिप्रतापानि स-
त्र कीर्त्तिकान्त्योर्बिम्बप्रतिबिम्बभावः यथा वा ।। कामं नृपाः सन्तु सहस्रशोऽन्ये
राजन्वतीमाहुरनेन भूमिं ।। नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्र-
मसैव रात्रिः ।। यथा वा ।। देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।। अब्धिर्लङ्घित एव
वानरभटैः किन्त्वस्य गम्भीरतामापातालनिमग्नपीवरतनुर्जाना-
ति मन्थाचलः ।। नन्वत्रोपमानोपमेयवाक्ययोऽज्ञानप्रेकप्रेवधर्मद्व २४

२३

तिप्रतिवस्तूपमायुक्तामिमं ॥ अचेतनेमथाचलेज्ञानस्य बाधितत्वेन तत्र
नार डा॒र्ती स्त्रनेन सागराधस्तनावधि द्विपर्यन्तसंस्पर्शमात्रस्य विवक्षितत्वाद्
त्रोद्धाहरणोपदार्वतिर्दीपकाद्विशेषः पूर्वनदप्रस्तुताप्रस्तुतविषयस्य
स्तुतोद्भवः ॥ विधर्म्येनाप्ययं दृश्यते ॥ यै हतं चेगर्वामित्रस्त्वं मनस्त्वयाकि
मन्यदेवं निहन्ता श्चनो द्विषः तमांसि तिरो तिहितावदं स्तु मान्नयावद्याया
स्तुद्यादिमौलितां ॥ वाक्यार्थयोः सदृशयोर्वाक्यार्थो निदर्शना; यद्यदः ०
क४ सोपमतासे यं पूर्णेंदोरलंकृता ॥ अत्र दावत्र रूपसोपमत्वस्य मेवेन वा
क्यार्थस्य पूर्णेदोरकलंकतस्य उपमानवाक्यार्थस्याद्येयत्वं ध्यामिव्या
रोपः पथावा ॥ अरण्यरु दितं कृतं शवशरीरमुद्वर्तितं स्थले जमिम
वरोपितं स्तुचिरमूषरे वर्षितं ॥ श्वपुच्छमवनामितं बधिरकर्णजापः

ॐ

स्तोद्धतां धम्मुरवदर्व्वं जोय द्वक्षोजनसेवितः॥ अत्राक्षध्वजनसेवाया

अरव्यशेदनादीनां च यत्क्रामेव्यारोपः पदार्थवृत्ति मव्ये केवद्वस्यन्या

निदर्शनां॥ यथा वा॥ हंने त्रयुगनंधत्ते लीलांबुनीलांबुजन्मनोः॥ अत्र

नेत्रयुगले नीलांबुजगतलीलावदार्थारोपो निदर्शना। वियोगगौडनारीणां

यो गंडतलपांडिमा॥ अदृश्यत सखे श्रीमंजरीगर्भरोचिषा॥ ख्व

रणे उपमेये उपमानधर्मारोपः इह उपमाने उपमेयधर्मारो

पमित्युदाहृते अप्यत्रान्यधर्मस्यान्यत्रारोपेण तत्समानधर्मताध्येवा

य इति भेदः। उभयत्राप्यन्यधर्म इत्थं पदार्थवृत्तिनिदर्शनालंलितोपमेति उप

मेयोपमापर्यवसानं तत्वं। वियोगगौडनारीणामिति श्लोकः प्राचीनैर्व्याप

दर्शितव्याहृता॥ यद्यपि विशिष्टपदार्थेमयोरे

×वृत्तिनिदर्शनायामुदाहृतत्सत्यापि

क्याशवो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरध
र्मारोपः पदार्थवृत्तिनिदर्शने प्रतिव्यवस्थाः मा भि तासामिरयमहोदाहृतः एवं
चैतद्विसतिशोभेषाद्गातर्थ्यसाद्यर्पितानामितरमनुसारं तोदर्शयंतो यि भुद्गोय
रमचरणपातेर्दु मीहंदोग्धकामाकरममब्जसवामकामधेनोस्थितो यो दो र्यो
मर्धिं तितीर्षतः लघुवस्वडुनान्तवं॥ इत्यादिषु वाक्यभेदाना विशि वाक्यार्थवृ
त्तिरेव निद॥ र्शना॥ विशिष्टयोरैक्यारोपसद्भावाद्वाक्यार्थयोः सदृशयो
रितिलष्टवाक्यार्थशब्देन बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टरूपयोः
प्रस्तुताप्रस्तुतधर्मितो विवक्षितत्वात्॥ एवं रडसेवाप्रवृत्त्यागामेसिधा
रावहेलनं च यावन्नवरिष्ठं गोमायोर्नाविदनचुंबनेमिसत्त्वप्रस्तुताप्रस्तुत

कु॰

९६

दृष्टान्तयोरैक्येक्यपद्योपात्तस्तेविवाच्यार्थव्यक्तिनिदर्शनायानश्रुतिः तयोर्
बिंबप्रतिबिंबभावापन्नतवस्तुविशिष्टव्यापाररूपत्वादिति॥अतएवनिदर्श
र्शनायारूपकाद्भेदःरूपकेयविशिष्टयोरेवमुखचंद्रादिकयोरैक्या
रोपः॥अभिदंडोहरेरूर्द्ध्वमुख्यसरोजनलिनिग्रहे॥विधिविष्टरपद्मस्य नालं
दंडोमुदेस्तुवः॥इतिविशिष्टरूपकोदाहरणेपितबिंबभावापन्नवस्तु
विशिष्टताविधातृविष्टरकमलविशिष्टरूपसाधारणधर्मवतासंप
न्नार्थमेवतत्रविशेषणोपादानम्॥यद्वाव्दःसोपमेत्यादिनिदर्शि
नोदाहरणाभ्युदात्पणीतोद्धिद्धीनामानंदकरस्यादिनेवात्रविशेषण

यौविंवप्रतिविंवभावात् । प्रकृतविषयविषयिविशेषणानां परस्परसादृश्येन विं
वप्रतिविंवभावोस्ति । योन्सा गस्य धुरंधरता धुवल्लविम्मतीतारका स्योन्यंत
र्जनव्यसनरसिकारात्रिकापात्रि लिकायं । दीपाद्दीपं प्रमतिदधती चं
द्रप्रज्ञापाले न्यसांसि जन परिमलं लांछनस्य छले नेति सा वरं यव
स्तुवैलोको दाहरणे तत्रापि विषयविषयितोस्तु विशेषणानां यथा हेवाक
हि वेक्यारोपः नुन्नु त्योस्त्रौ विशिष्टरात्रिरूपविषयस्य गस्तादि विशिष्टकापा
लिकारूपविषयिता च विरोरात्रिचेति कारोपोस्तीते स्माज्ञाडसे वा प्रव
व्याप्ता ग्रिसाद्दावपि वाक्यार्थवृत्तिनिदर्शनेति प्रकृतं । तत्र तदंतरे हि हप
दार्थवृत्तेरेव तिदर्शनया भाव्यं ॥ अपरां बोधनं प्राहुः क्रियया स्वस्वहेत्वर्थ

कु॰

यो॰ नश्येद्राजविरोधीति॥ श्रीसांचंद्रोदये तम॰:॥ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं॥
विभावयन्समृद्धीनां फलं सुहृदनुग्रहं॥ कस्यचित्किंचित्क्रियया विशिष्टस्य त
त्क्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं यत्र बध्यते तदपरां निदर्शनमाहुः॥
२७ असदर्थबोधने उत्तरार्द्धमुदाहरणं तत्र स्यादिति बोधयेदिति वक्तव्ये बो
धयदुदासस्य गर्भमानत्वादयोगः॥ ततश्च राज्ञा चेद्रुतापसह विरुद्धस्तस्य
नाशक्रियया विशिष्टस्तेन॰: स्वकीयनाशक्रियया दृष्टांतेन तथा अन्यो बोध
राजविरुद्धश्चेन्नश्येदिति निरवयवसायिनोऽर्थनो बोधयेदेव नश्यतीति
निबंधनादसदर्थनिदर्शनोक्ता॥ उत्तरश्लोके सविता स्वोदये सप्रसप्रय
प्रवपद्मेषु लक्ष्मीमादधानस्स्वायावज्जलक्ष्मा धानक्रियया परान्प्रतिसर

द्वीनां फलं स्वहृदनुग्रवत्वेति अत्र परस्परमर्थं नो घयन्निबद्ध इति सदर्थनिदर्श
नाय यावा। केनन तं पद मनाप्य यो लक्ष हे लये वस पति तदिति ध्रुवं ।। शौन शेव मह
रगतः रुप द्रुणाश्चारुमारुतः धृतः पतराघः ।। अत्रां गिरि शेबरव क्षिबिंदुगं
णो मंदमारुतमा रत्रे सापिकं पितः पतल्लघोरुन्नतपद प्राप्तिः पतनहेतुरि
ति सदर्थं बोधयन्निबद्ध इत्यसदर्थनिदर्शना ।। अडामत्तापदे धत्ते पादेवं
वरमागतं सतां कार्यतिथ्यैयीति बोधयन्नगरहमेघिनः ।। अत्र समागतार
विशिरस्यासंभाव मन्दुद्देयाचनः सनिष्ठ यारविचारताविप्रयुक्ता समा
गतानां सतामेव गृहमेधितिरातिथ्यं कार्यमिति ।। सदर्थं बोधयन्नि
बद्ध इति सदर्थनिदर्शना ।। अत्र केचिद्वाक्यार्थवृत्ति पदार्थवृत्तिनिद

ईं नाडू यं ॥ अस्य संप्रवदूस्य संबंधनिबंधनेति तृतीयातत्पुरुषः संप्रवदूस्य संबंधनिबंधनमिति वा व्यवहरंति ॥ तथाहि ॥ आद्यानिदर्शनायांवाक्यार्थयोर्विक्य संप्रवन्तयोः साप्येपर्यवसानं ॥ द्वितीयनिदर्शनाया प्रविअन्यथ प्रोन्यनासंप्रव न्ध प्रमितोः साप्येपर्यवसानं तृतीयनिदर्शनायांतु स्वक्रीयायापरान्प्रतिसदसदर्थ बोधनं संप्रवदेव स प्रतां गमयीकरोति बोध यन्नर गृह्यमेधिनद् रादीकारी बोधिर ध्यापयतीति वसप्रर्थो चरतीतिचः प्रयोगः ततश्च यथाकारी बोधि: शीताव नयने बहूनध्याप न समर्थान्करोतिं एवं वर्तते प्राणः पर्वत स्व

यमरूपमानभावेन ग्रहमधिनरुक्तबोधनसमर्थान्करे....तदूसमते।(
यथायेप्रवृतिःसमागत्तरविंशिरसासंभावयति।।एवंग्रहमपि धीसमा
गतंसंतमुचितपूजयासंभावयेदिति।।अतःसंभवतिबोधनसंबो
धनसंबंधइति।व्यतिरेको विशेषश्चेद्गुवमानोपमेययोः।शैला
इवोन्नताःसंतःकिंतुप्रकृतिकोमलाः।।यमरूपमेयाधिक्यपर्य
वशायीव्यतिरेकः।।यथावा।।पल्लवतःकल्पतरोरेषविशेषःकरस्यतेवी
र।।एषयतिकर्तामेकःपरस्यकर्तानिरस्यनूरुते।।तापनवपयविसायी
(यथा।।रक्तस्त्वंनवपल्लवैरहमपि श्लाघ्यैःप्रियायाःगुणैःत्वामायाति

शिली मुखाः स्मरधनुर्मुक्ताः सर्वे मामपि॥ कांता पादतलाहतिसाव मुदे
तद्धर्मभाषावयोः स्पर्द्धुलमम शोक केवलमहं धात्रास शोकः कृतः॥ अ
नु भवव पर्यवसायि यथाहृतर निबद्धमुष्टेः कोपमिव तास्य सहजमलि
29 नस्यकरूपता स्वरूपा तास्य च केवलमाकारतो भेदः॥ सहोक्तिः साहभाव
श्चेदर्भासते जनरंजनः॥ दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह॥ य
था॥ छायासंश्रयते तलं विटपिनां श्रांतेव पांथैः सममूलं मानतिस
रजालस्य जडता ग्लानेव मीनैः सह॥ आचामत्याहिमांशुदीधितिरप
स्ताशेषवल्लायकैः सम्मंनिद्रागर्भमहं सहप्रविशति क्लांतेव कांता जनैः॥

त नरंजनइयुक्तेः ॥ अनेन साङ्ग विडशंकुराशेरिसादीन सहोक्तिरलंकारः ।
विनोक्तिः स्यौद्विनार्किंचित्प्रस्तुतं हीनमुच्यते । विद्या हृद्यापि सावद्या विना विनय
संपदं ॥ यथावा ॥ यश्चौ रामं नपश्येत्तु यं च रामो न पश्यति ॥ निंदितः स भवेल्लो
के स्वात्माप्येनं विगर्हते ॥ अत्र रामदर्शनं विना निंदितत्वं विनाशब्दमंतरेण
प्रतिपादितं ॥ तचेत्किंचिद्विनारम्यं विनोक्तिः सापि कथ्यते ॥ विनाखलैर्विभाते
वारजेंद्रभवतः सभा ॥ यथावा ॥ आविर्भूति शशिनि तमसा मुच्यमानेव रा
त्रिर्नैशस्याचिर्हुतभुज इव छिन्नभूयिष्ठधूमा ॥ मोहेनांतर्वरतनुरियंलक्ष्य
ते मुक्तकल्पा गंगा रोधःपतनकलुषा गृह्णतीव प्रसादं ॥ अत्र तमःप्र
भृतीनि विना निशादीनां रम्यत्वं विना शब्दमंतरेणादर्शितं ॥ समासोक्तिः प

कु॰

रिस्फूर्त्तिप्रस्तुतेप्रस्तुतस्यबोधकः॥ अयमैन्द्रीमुखंपश्यरक्तश्चुंबतिचंद्रमाः॥
अत्रैवप्रस्तुतवृत्तान्तेवर्णमानेविशेषणतासाम्यबलादप्रस्तुतवृत्तांतस्या
पिपरिस्फूर्त्तिस्तत्र समासोक्तिरलंकारः॥ समासेनसंक्षेपेणप्रस्तुताप्र
30 स्तुतप्रस्तुतवृत्तान्तयोर्वचनात्॥ उदाहरणमयमैन्द्रीअत्रचंद्रस्यप्राची
प्रारंभसंबंधलक्षणोउदयेवर्ण्यमानेमुखशब्दस्यप्रारंभवदनसाधा
रणत्वाद्रक्तशब्दस्यारुणताकामुकसाधारणत्वाच्चुंबतीत्यस्यप्रस्तुतार्थेसं
बंधमात्रपरस्यशक्तत्वार्थांतरस्याधारणाच्चंद्रमसःशब्दगतपुल्लिंगेन
ऐन्द्रीगतस्त्रीलिंगेनतात्पर्यतिप्राचीचंद्रसंबंधरूपेनचोपरक्तत्वात्तस्यैवनि

3

तास्य कपुरस्यवरसांतः प्रतीयते॥ यथावा॥ आवलग्गकुचभारभाकुलक
चंद्र्याजोल्लसावलिप्रेंखत्कुंडलशोभिगंडयुगलं प्रस्वेदिवक्रांबुजं॥ बु२
शश्वद्धनकरप्रहारमाधिकश्वासं स्वादेतया यस्मात्कंदुकसाद
रंसुभगया संसेव्यसेतत्कृती॥ अत्र कंदुककर्तृतांतेन कमिनेव्याव
लावल्कुचभारमित्यादिक्रियाविशेषणतासाम्यात् विपरीतरतास्य
कामनापि कावृतांतः प्रतीयते॥ एवंत्रविशेषणानिश्लिष्टानि॥ इह स्या
धारणानीतिभेदः॥ सारूप्यादप्रस्तुतस्य प्रस्तुतांतरंव्यते॥ यथा पुरायत्र
स्रोतःपुलिनमधुनातत्र सरितांविपर्यासंयातोघनविरलभावः क्षि

ॐ

तिरश्चां। वहोईश्वं कालादपवरमपि व मन्येवन। मिदं निवेश ३ श्रीनानां तदि
दमितिबुद्धिं दृढयति। अत्रैव नवृत्तिं नेप्रस्तुतेन तस्यारू प्यारं कर्तुं विवु
धनसंतानादि समर्थ्यासमर्द्धिविपर्यासप्रामस्यतस मा... यस्य
31 ग्रामनगरागौनन्द्वतांतःपातीयते। अत्र ... विशेषदी साम्याया सारू + च
प्याद्युपदप्रस्तुतवर्त्तांतस्यप्रयापनं तावकृतो विशेषेतस्य मारो
पार्थं स्य वो थे वप्रस्तुतानन्वयिनः कविसंरंभवशो चरलायोगाद्।
ततश्च समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः। नो

न्तरूपकाइव प्रसूतेअप्रसूतरूपस्य मारोपोऽप्रसिद्धस्य चन्द्र इत्यत्र मुखे
चन्द्रस्यारोपहेतुश्चन्द्रशब्दसमभिव्याहारश्चन्द्रत्वं भवति चन्द्रमाइत्यादिसमा
सोदाहरणं दाहरतो चन्द्रादेः जाग्रव्याघ्राद्यारोपहेतौ साद्दश्चक्त्रौ पदसमभिव्याहार
स्याभावात् । निरीक्ष्य विप्रु नयनैः पयोदोन्मुखं निशायामभिसारिकायाः । धा
रानिपातैः सह किं नु वान्तश्चन्द्रोयमित्यार्तितरं ररास इत्याद्येकदेशविवर्ति
रूपकोदाहरणताइवप्रसूतेप्रसूतारूपस्य मारोपगमकस्याभावात् । तत्र
हि विद्युन्नयनैरित्यत्र निरीक्ष्यतानुमतत्वादुत्तरपदार्थप्रधानमुपरूपं
सकादिसमासव्यवस्थितौ उत्तरपदार्थप्रतेन यनान्वयानुरोधात्पयोदेन्दुः
मपिबद्धरूपकरूपतांगमयत्रुपगम्यते नेहतथा निरीक्ष्यतावशाद्व्यागते
किमितिवेपतातप्रसिद्धुरिति श्लोके सत्वेकदेशविवर्त्यप्रसूतासाधारणा

कृ०

वृत्तांतयोर्वा चास्ति नापि श्लिष्टसाधारणादिविशेषणसमर्पितयोः प्रस्तुताप्र
स्तुतवृत्तांतयोरप्रस्तुतवृत्तांतस्य विच्छिन्नतया न च प्राधान्यप्रतीतिर्येन तदनुरो
धाद्वयं स्यात् बंधनवदिति सच्चेवार्थक्रम एवाप्रस्तुतरूपसमारोपणमभ्युपगच्छे
द् तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहारे समारोपमात्रमिह चा
रुताहेतुः यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणविशे
षणासमर्पितयोर्भिन्नपदोपात्तविशेषणतयोरिव विशेष्यवैव
साक्षात्तदन्वयादस्ति समग्रप्राधान्यं तथाप्यप्रस्तुतवृत्तांतान्वयानुरोधप्राधान्त
प्रस्तुतेः प्रस्तुतरूपसमारोपो गौणकार्यः। तथाहि यथा। प्रस्तुतविशे
तांतस्यान्वययोग्यतातात्पर्ये वा प्रस्तुते विजारादौ नास्ति प्र
बोऽप्रस्तुतवृत्तांत

स्तवृत्तांतस्यान्वययोग्यताएवंचसंप्रधानयोःप्रस्तुतवृत्तांतयोरन्यतर
स्यावश्यमारोपस्युपगंतव्येअस्तुतएवप्रस्तुतेप्रस्तुतवृत्तांतस्यारोपश्चा
रुताहेतुरितिचेत्।नन्वेवंसतिविशेषणसाम्यादप्रस्तुतस्यगम्य
त्वेसमासोक्तिःविशेषणानांसाम्येनयत्रप्रस्तुतवर्त्तिनांअप्रस्तुतस्यग
म्यत्वंसमासोक्तिरित्यतइत्यादीनिप्राचीनानांसमासोक्तिलक्षणानिनसं
गच्छेरन्अप्रस्तुतेश्लिष्टसाधारणादिरूपविशेषणसमर्पितानुराग
पूर्वकवदनचुंबनाद्यप्रस्तुतवृत्तांतसमारोपमात्रस्यचारुताहेतु
तामुपगमेनविशेषणसाम्यकृतकार्यकाद्यप्रस्तुतधर्मिव्यंजना

५ कामुकाद्यैरभिव्यक्तेः पुनस्तदीयतानुसंधानं तत्र भवति। यस्यास्स्वरूपतो रू
कु. पेण राजाद्यादिना न संबंधि
नप्रकाशनादिति चेत् उच्यते स्वरूपतोऽप्रस्तुतवृत्तांतस्यारोपो न चारुताहे
तुः किंत्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्य तस्यासंवः। तथा
हि तस्यैव रसानुगुणत्वं न च तावदेवगमनाविशेषणपदानां सामर्थ्य
33 मस्ति तत्र श्लेषादिमहिम्नाविशेषणवाचकैः स्वरूपतः समर्पितेन वदनचं
द्रनादिना तत्संबंधित्वेन राजादौ स्थापितेऽपि नरश्वादौ तदीयत्वानुसं
धानवदिति विशेषणसाम्येन वाच्योपस्कारस्याप्रस्तुतव्यंजनस्या
स्य पेक्षा। अत एव श्लिष्टविशेषणमात्र यात्रिवसाधारणविशेषणमात्र
मप्यप्रस्तुतव्यवहारसमारोपः सैव प्राचीनानां प्रवादः। कंदु कं

२ स्वरूपतः कंदुके चितस्य सत्वेनासमारोपणीयत्वात् ॥

यावता कुचपारत्वादिविशिष्टवनितास्तव्यक्तस्य कामुकसंबन्धित्वेनैव समारो
पणीयत्वात् किंच सारूप्यनिबंधनत्वेनोदाहृतायां समासोक्तौ च प्रस्तुत
वृत्तांतस्य शब्दार्थस्याप्रस्तुतवृत्तांतरूपेणोपगम्यतया तेन रूपेण तत्त्वसमा
रोपसिद्धेरन्यत्रापि तथैव युक्तमिति युक्तं प्रवक्ष्यामीनानान्तरलक्षणमिति विभा
वनीयं अलंकारः परिकरः साभिप्रायेविशेषणे सुधांशुकलितोत्तंसस्ता
पं (२) हरतु वः शिवः अत्र सुधांशुकलितोत्तंस इति विशेषणं तापहरणस्याभि
प्रायविशिष्टाभिप्रायं। तथा वो तव प्रसादात्कलुषं यघोपि सहाय कं भग कं१
मेव लक्ष्मीं कुर्यादिरस्याधिपिनाकपाणिर्देव व्यक्तिके प्रप्रथ विनोत्थे ॥

८०

अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुध इत्युपलि प्राइ अर्थवि
शेषणं च सारासारा साराऽधेला त्रिवापगर्भे। यथावा। सर्वशुचि
निधानस्य कृतघ्नस्य विनाशिनः। शरीरकस्यापि कृते मूढाः पापानि
कुर्वते। अत्र शरीरविशेषणानि तस्य हेयतोन्मासरथसनी यस्तानि
प्रायगर्भाणि। यथावा। वाक्यानेकतयावस्थितं श्रुतिगणं जन्मी न वल्मी
कतो नाभौ नाभवमच्युतस्य सुमहद्भाष्यं च नाभाषि वा। चित्रार्थां न बृह
त्कथामवकथं सुत्राम्णि नासं गुरुः देव त्वद्गुणवृन्दवर्णनमहं कर्तुं
कथं शक्नुयां॥१४॥ अत्र श्रुतिगणं न व्यासास्मि त्यादीनि विशेषणानि

सस्मिन्व्यासाद्य साधारणकार्यकरणप्रतिबन्धकत्वेन नाहं व्यासइ
सादिभिप्रायगर्भितत्वाद्योदाहरणयोरेकैकं निशेषणं यसमनं
तरयोः प्रत्येकं बहुनि विशेषणानि तत्रापि प्रथमोदाहरणे सर्वाणि
विशेषणान्यकाभिप्रायगर्भाणि पदार्थरूपाणि च द्वितीयोदाहरणे
भिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चेति भेदः तेषु व्यंगार्थसद्भा
वेपि न ध्वनिव्यपदेशः तावद्धरणे मन्मथस्य केतुलनायेन सर्वेषां
भ्रियेर्यभेऽङ्गवक्त्रे शरीरसंरक्षणार्थं पावमाचरतां भू[illegible]दहे सस्य वर्ण
नीयरूडामृणाकृपणाशक्तो च वाच्यएवोपस्कारकत्वोद्भृतएवकीं व्या
र्थसंबाच्यपरिकरत्वात्परिकर इति नाम्नास्यालंकारस्य। केचित्तु

निष्प्रयोजनविशेषणोपादाने ऽपुष्टार्थदोषः स्यात् । सति सप्रयोजने हि
विशेषणस्य दोषाभावमात्रं न कश्चिदलंकारः । एकनिष्ठतादर्शने क-
विशेषणोपन्यासः परं वैचित्र्यविशेषः परिकर इत्यलंकारमध्ये प-
रिगणित इत्याहुः । वस्तुतस्तु अनेकविशेषणोपन्यास एव परिकर
इति न नियमः । श्लेषयमकादिवदपुष्टार्थदोषाभावेन तत्रैकस्या-
पि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशेषसद्भावात्
परिकरत्वोपपत्तेः । यथा । अतियजेत निजां यदि देवतामुभयतश्च्य-
वते जुषतोऽप्यथ । पितृभिस्तव सा देवतकाव पवनवतानवताकि

रवास्माकं रदनकत्वेन दैन तमिति स एव पूजनीयो ॥ श्लोकः पुरुहूतद
त्तेवं परं । वनवतेति गोवर्द्धनगिरे

र्महिं ह्रदा ॥ अत्र पुरुहूत पूजोपकरणानंदादीन्प्रति भगवतः कृष्णस्य
वाक्ये गोवर्द्धनगिरे र्विशेषणं कातनवर्ष निर्झरादिमत्ताद्य उपपल मूलं तदना
तलादि मिरारंभ त्ववतां नाम स्माकं अस्मद्वेतानां च गवामपमेवरक्षकः इत्यभिप्रा
यगर्भैरेवं अत्र साभिप्रायविशेषणविन्यासस्यापि विच्छित्तिविशेषवशादलंका
रत्वासिद्धावन्यत्रापि शुद्धां शुकतितोंतस्य इत्यादौ तस्या मलाभोनंनिवार्यते ॥
अपि च एकपदार्थहेतुकं काव्यलिंगमलंकार इति सर्वसंमतः । तद्वद्वे
कस्यापि विशेषणस्य साभिप्राय[illegible]स्यालंकारत्वं युक्तमेवं साभिप्रायविशे
ष्यत्वे तु [illegible]रिकरांकुरः चत्वबांकुरुपार्थिनां दातादेव श्वन्वत

ॐ

भुजः इति विशेष्यं पुरुषार्थचतुष्टयप्रदानसामर्थ्याभिप्रायगर्भं चैवं । गौरीन्द्रः स्मरस्मा
वतंसलिखितः हैहयाधिपः । ... प्रारब्ध ... डलः साक्षात्कोऽडप्रवक्ता ते गुणाः ।
कुर्वीरन् इत्यादि विशेष्यपदानि सहाभिप्राया याद्यभिप्रायगर्भाणि । नाना
र्थसंशयश्लेषो वच्यावच्यौ यात्रितः ॥ सर्वदोमाधवः पायात्स योगं गामदी
धरत् । अनेनैव वक्रखण्डनं डारिणा हितरात्रिना । उद्धर इ रिकीलालः ... अ
नेवा हि नीयते ॥ अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रस्तुता
नेकविषयः अप्रस्तुतानेकविषयः प्रस्तुताप्रस्तुतानेकविषयश्च सर्व
देत्यादिना क्रमेणोदाहरणानि ॥ तत्र सर्वदोमाधव इति स्रोतव्य

श्ला० १

३९

येन प्रकृतयोर्हरिहरयोः कीर्तनं प्रकृतश्लेषः ॥ अङ्कं कमलम[?]स्य [?] द्वयोरुप
मानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृतश्लेषः । वाहिनीपतिः समुद्रश्च तत्र सामितो
शस्त्रप्रपातोऽस्य तदुचितस्य सेनापतेरेव वर्णनं प्रकृतमिति प्रकृताप्रकृतश्लेषः
यथा वा । प्रातः कान्तो दर्शयेन[?] द्रोग्धा विकरणा रसना ॥ पूतनामारणख्यातः स
न्मस्र[?] शरणं प्रभुः ॥ नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः । सदृशे वनवृद्धा
नां कमलानां त्वदीक्षणे ॥ असावुदयमारूढः कान्तिमान्रक्तमण्डलः ॥ राजा हि
रति लोकस्य हृदयं मृदुभिः करैः ॥ अत्राद्ये स्तोतव्यत्वेन प्रकृतयो रामकृष्णयोः
श्लेषः । द्वितीये उपमानत्वेनाप्रकृतयोः वकहरिणयोः श्लेषः । तृतीये रात्रिवर्ण
नप्रस्तावे प्रकृतस्य प्रसन्नोदितचन्द्रस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्लेषः ॥

यदत्र प्रकृताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिमिच्छंति प्राञ्चः तत्प्रकृताप्रकृता
भिधानतन्मूलकस्य उपादेरलंकारस्यैवाभ्यसाभिप्रायं न तु प्रकृतार्थसौवव्यंग्यसाभि
प्रायं अप्रकृतार्थस्यापि शक्त्या प्रतिपाद्यस्याभिधेयत्वावस्थाभावेन व्य
३१ त्यनवेक्षत्वात् यद्यपि प्रकृतार्थे प्रकरणवशाज्झटिति बुद्धिस्थिते सत्येव
पश्चादुपपत्तेः मासाध्यधनादिवाचिनाराजकरादिपदानां अन्योन्यसन्निधा
नबलात्तद्विषयशक्त्यंतरोन्मेषपूर्वकमप्रकृतार्थः स्फुरेत् । नैतावता तस्य
स९ व्यंग्यत्वं शक्त्या प्रतिपाद्यमानोऽर्थो वव्यत्यनपेक्षत्वात् ।। पर्यवसिते प्रकृ
ताभिधाने पश्चात्स्फुरति का प्रसंगः इह श्लेषो प्रकृत अस्ति चान्यत्रापि रहः
स्त्वेव ! यथा अयमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः स

ततमस्तमतामगम्य: रूपा: परिभ्रतदिकरिकासहीर्विप्रर्त्ति ।। प्रंदम
क्षिप्रधरर्व्वमोपकादर्शितिश्वपपृचाप्रवत्त प्र: दृष्टपत्तिप्रिरजं
क्षिवेविरे दोपप्राषधिपतेरसन्निधो ।। अत्राडिसप्रासोत्तुदाडु
रणायो: ।। प्राकरणिके पेप्रवरणवशाज्रू टितिवद्धिस्पेविशे
षणस्या प्याद्प्रवर्ततेपि वरूवे स्पावत्तांतादि: प्रतीयतेत त्रस्य
मासोलेर प्रंगश्ले षइति स्यवेबाप्रमिमृतरप: एवमन्यत्रापि
श्लेषेगरू टेष्व निरुद्धिर्न [illegible] इति प्राप्रवती: पताकारा

गं विवित्ता इति वद्धियंती: यस्या मलिंदेषु नमद्गु लौक्ता: समंवद्ति
